**वेतालकथा**

अथैकदा विक्रमनामराजा

सर्वार्थसिद्धीतिमुनेर्निदेशात्।

रात्रौ हि वेतालपरिग्रहेच्छुः

उवाह कञ्चिमृतमर्त्यदेहम्।। 1

ततस्तदन्तर्न्निदिहितो हि भूतः

प्रोवाच चैनं रमणीयवाग्भिः।

श्रोष्यामि राजन्सरलां कथां ते

अस्त्वध्वखेदोपि नः लाधवं च ।। 2

कश्चिद्द्विजोस्त्युज्जयिनीप्रदेशे

नाम्ना हरिस्वामिरिति प्रसिद्धः।

स यापयामास दिनानि तुष्ट्या

धर्मिष्ठदारैशरपिधर्मवृत्या।। 3

अथैकदा दैववशात्तयोस्तु

जातो कुमारः स तु धर्मनिष्ठः।

आनन्दयन्ती ह्यथ बान्धवाँस्तौ

सोमप्रभाख्या च सुतापि जाता ।। 4

काले गते वर्धितयौवना सा

विनिश्चिकायात्मवरं तु शूरं।

ज्ञानिं च सच्छास्त्रविशारदञ्च

नो चेत् ममासूँश्च विमोचयिष्ये । 5

अथैकदा दक्षिणदेशराज्ञि

दौत्येन राज्ञा खलु प्रेषितः सन्।

सः तत्र सन्दृष्टकुमारके तां
विनिश्चिकार्यार्पयितुं वरेण्ये॥ 6
तस्मिन्दिने तस्य तु धर्मदारैः
शूरे तु यूने हि विवाहकार्ये।
तां योजयामास तथा तयोस्तु
पुत्रेण विज्ञानिनि चार्पिता सा॥ 7
एवं हि ते सप्तमवासरेथ
जवाद्धरिस्वामिगृहं प्रपन्नाः।
कन्या हृता दुष्टनिशाचरेणे-
त्येषा हि वार्ता खलु स्वीचकार॥ 8
विचिन्त्य शास्त्राणि बहूनि सम्यक्
ज्ञानी जगादाथ तु कन्यकां तां।
विन्ध्याचलप्रान्तगुहानिवासि-
दैत्यो हि कश्चिद्रमणीं बबन्ध ॥ 9
तदैव साङ्केतिकपण्डितस्तु
रथं चकाराद्भुतशस्त्रयुक्तं।
तद्रक्षगेहं किल प्राप्तवन्तः
विन्ध्याचलस्यापरघोरपीडं॥ 10
ततश्च तद्राक्षसशूरयोर्मिथः
महानभूदाहवमद्भुतात्मनोः।
शूरो तथा हन्त सः दिव्यशस्त्रैः
यामीं पुरीं प्रेषितवान् दनूजम् ॥ 11
आरुह्य तैः साकमहो रथं तं

संप्राप तस्याः भवनं जवात् सः।

तस्याः विवाहोत्सवतुष्टतातः

खिन्नस्तु जातः कलहेन तेषाम् 12

ज्ञातं मयाद्यं खलु रक्षगेहम्

तेनैव तां रक्षयितुं समर्थाः।

नन्वर्पणीया किल कन्यकैषा

मयीति वाक्यम् प्रजगाद धीमान् ॥ 13

ततः स विज्ञानिरुवाच वाक्यम्

रथं चकाराद्भुतशस्त्रयुक्तं

हतो हि तेनेव  निशाचरोपि

सा दीयतां मे द्विज सप्रहर्षम् 14

शूरो जगादाथ निशाचरेण

युद्धं मयैवाचरितं च घोरम्

हत्वा च दैत्यं कृतवान् सुतायाः

रक्षां च,सा तेन ममस्तु भार्या ॥ 15

एवं प्रवृद्धे कलहे च तेषु

सः भूसुरोभूद्तिखिन्नचित्तः।

अथ सः वेतालवपुर्जगाद

कस्तेषु तस्या पतिमाप्तुमर्हः॥ 16

श्रुत्वा वेतालवाक्यं निरुपमरुचिरं

विक्रमादित्यराजा

उक्तो ह्येषात्र शूरे निरुपमसमरे

योकृथाः रक्षहत्यां ।

तस्मिन्नेवार्पणीया स हि खलुतृणवत्

कल्पयामास प्राणान्

इत्थं तद्राजवाक्यात् सुविमलहृदयो

तुष्टचित्तोभवत्सः॥ 17

-शङ्करनारायणः

पूर्णवेदपुरीस्थे सर्वकारीयसंस्कृतोच्चतरविद्यालये अध्यापकः।

पूर्णवेदपुरी -682301

जङ्गमदूरवाणी 9744780455